

# आत्मावबोधः

पूर्वाचार्याः श्रीजयशेखरसूरयः

ફોગટ છે
બીજું બધું જ જ્ઞાન
જો નથી
આત્મજ્ઞાન.

पूजनीयपूर्वाचार्यश्रीजयशेखरसूरिवरविरचितः

नवनिर्मित-बोधोपनिषद्-वृत्तिविभूषितः

# आत्मावबोधः

नवसर्जनम् - सम्पादनम्

प्राचीनश्रुतोद्धारक

प.पू.आ. श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ. श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળગ્રંથ : **આત્માવબોધ** (પ્રાકૃત ૪૩ ગાથા)

મૂળ ગ્રંથકાર : પૂજનીયપૂર્વાચાર્ય
શ્રીજયશેખરસૂરિવર

નવનિર્મિત સંસ્કૃત વૃત્તિ : **બોધોપનિષદ્**

નવ સર્જન+સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી
**હેમચંદ્રસૂરીશ્વરજી** મહારાજાના
શિષ્ય પ.પૂ.આ.શ્રી
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

વિષય : **આત્મજ્ઞાન**

વિશેષતા : ગાગરમાં સાગર... અંજલિમાં ગંગા...
અનુભૂતિના આકાશનું અર્પણ... અને
આત્માનો આમૂલચૂલ ઉદ્ધાર...
પરમના પથિકો માટે પરિશીલનીય પ્રબંધ

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

• પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦ •

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન

**1) શ્રી અક્ષયભાઈ શાહ**

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

**2) શ્રી ચંદ્રકાંતભાઈ સંઘવી**

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

**3) મલ્ટી ગ્રાફિક્સ**


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




# અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર

**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ

**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

# આતમજ્ઞાની

# શ્રમણ કહાવે

વિષયતૃષ્ણા વિલય પામી જાય
અધ્યાત્મના અમૃતની સરવાણીઓ ફૂટી નીકળે
ને
આત્મજ્ઞાનના ઉચ્ચ શિખરો સર થઈ જાય
મળ્યું છે એ માટે
અમોઘ આ આલંબન
ચાલો
સાર્થક કરીએ.

– આ. કલ્યાણબોધિસૂરિ

अथ

# आत्मावबोधः

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्य-
मात्मावबोधे कथये रहस्यम्॥

इह हि परमकारुणिकः प्रबन्धकारो विश्वविश्वव्याप्तदुःखदर्शनद्रवितान्तःकरण-तया तज्जिहीर्षातस्तदपहारोपायानुगतप्रेक्षा-चक्षुरात्मावबोधमेवानन्योपायतया पश्यन्

तमेव प्रतिपादयितुमिच्छुरादौ मङ्गलाभिधेयावाह-

**धम्मपहारमणिज्जे,**
**पणमित्तु जिणे महिंदनमणिज्जे।**
**अप्पावबोहकुलयं**
**वुच्छं भवदुहकयपलयं॥१॥**

**धर्मः**-श्रुतचारित्रलक्षणो देशसर्वविरत्यात्मको वा, तस्य **प्रभा** - विवेचनविरोकः, तया रमणीयान्- त्रैलोक्येऽपि कम्रतमान्, जगज्ज्येष्ठवस्तुप्रदातुस्तथात्वस्य न्यायोपेतत्वात्, उक्तश्च - धर्मश्चिन्तामणिः

श्रेष्ठो, धर्मकल्याणमुत्तमम्। हित एकान्ततो धर्मो धर्म एवामृतं परम् - इति (**धर्मबिन्दुः**)।

तानेव विशेषयति - **महेन्द्र-नमनीयान्**- सहजगुणगणगरिमालङ्कृत-तया कल्पशक्राणामपि वन्दनार्हान्, यदार्षम् - सव्वो गुणेहिं गरुओ, गुणाहि-यस्स जं लोगवीरस्स। संभंतमउडविडवो सहस्सनयणो सययमेइ - इति (**उपदेश-माला**)।

कानेवंविधानित्यत्राह- **जिनान्**, नि-र्जिताजितरागादिरिपुगणान् तीर्थकृतः, **प्रणम्य** - भक्तिप्रणामगोचरीकृत्य, भय-

प्रणामादेर्भावमाङ्गल्याहेतुत्वात्, तदर्थत्वाच्च प्रणामाभियोगस्य। एतावता मङ्गलमभिधायेदानीमभिधेयमाह- **भवदुःखकृतप्रलयम्** - चातुरन्तसंसारसागरवरिवर्त्तिनारकत्वादिदारुणदुःखसन्दोहविहितविनाशम्, **आत्मावबोधकुलकम्** - स्वरूपविज्ञानविषयकगाथागणम्, **वक्ष्ये** - शास्त्रसम्प्रदायसंवेदनत्रितयमवलम्ब्याभिधास्ये।

आत्मावबोधाद् भवदुःखप्रलयो भवत्येव, तद्धेतुविपक्षत्वात्तस्य, यदुक्तम्- आत्माज्ञानभवं दुःख-मात्मज्ञानेन हन्यते- इति (योगशास्त्रम्)। दुःखहेतुर्हि कर्म, तन्नि-

बन्धनं रागादि, तन्निदानं परपरिणतिः, तज्जनकश्चात्मानवबोध एवेति तज्जं दुःखं तत्प्रतिपक्षप्रतिनाश्यमिति न किञ्चिदनुपपन्नम्।

ननु यद्येवम्, तदाऽऽत्मावबोधमात्रेणास्माकं भविष्यति भवदुःखविमुक्तिः, अलं चरणाऽऽचरणेन, सकष्टत्वात्तस्य, सुखधार्यस्वरूपबोधस्य चाधिगतत्वादस्माभिरिति चेत् ? अत्रोत्तरयति-

**अत्तावगमो नज्जइ,**
**सयमेव गुणेहिं किं बहु भणसि ?**
**सूरुदओ लक्खिज्जइ,**
**पहाइ न उ सवहनिवहेणं॥२॥**

**किं बहु भणसि ?**, किल वयमात्मावबोधसम्पन्ना इत्यादि, प्रभूतोऽपि त्वत्प्रलाप मुधैवेति भावः। यतः **आत्मावबोधः** - प्रतिप्रदेशं परिणता स्वरूपविज्ञानसंवित्तिः, **स्वयमेव** - परप्रज्ञापनापेक्षामन्तरेणैव, **गुणैः** - इन्द्रियदमादिरूपैर्वक्ष्यमाणैश्चरणतपश्चर्यागुणैः, **ज्ञायते** - परिणतपारमर्षपीयूषैः महात्मभिः परिलक्ष्यते, यदुतायमात्मज्ञानसम्पन्नोऽज्ञो वा। यो हि पञ्चाश्रवप्रसक्तो बाह्याभ्यन्तरतपःपराङ्मुखश्च, अज्ञशिरोमणिरेव सः, अतो दूरेऽस्यात्मज्ञत्वगन्धोऽपि।

स्यादेतत्, यद्येवंविधोऽपि विशिष्ट-वाक्छटाभिः सतर्कमात्मन आत्मज्ञानित्वं प्रमाणयति, तदा कथं न प्रत्येयं तद्वच इति चेत् ? अत्र दृष्टान्तद्वारेण प्रतिविधत्ते, **सूरोदयः प्रभया लक्ष्यते, न तु शपथ-निवहेन।** यथैव शपथशतमपि मध्यरात्र-सन्तमससमासीनानां सूर्योदयः सञ्जात एवेति प्रत्याययितुमप्रत्यलम्, तथा चारित्र-विकलानामात्मज्ञानसम्पन्नत्वप्रतिज्ञा हेतु-शतसहस्रसहिताऽपि स्वसाध्यं साधयि-तुमसमर्थैव, प्रत्यक्षादिबाधिततया तेषां हेत्वाभासमात्रपर्यवसानादिति भावः।

॥ ७ ॥

ननु यद्येवं तदा तात्त्विकाऽऽत्मज्ञानस्य प्राप्त्यर्थं किं कर्त्तव्यम् ? कथं वा लक्ष्यतेऽन्तर्गत आत्मावबोध इति चेत् ? अत्राह-

**दम-सम-सम्मत्त-मित्ती-**
**संवेअ-विवेअ निव्वेआ।**
**एए पगूढअप्पाव-**
**बोहबीअस्स अंकुरा॥३॥**

अत्र तीव्रशब्दः प्रत्येकमभिसम्बन्ध्यः, अन्त्यदीपकत्वात्, अतस्तीव्रो दमः - प्रकृष्टेन्द्रियनिग्रहः, स्वविषयानुधाव-

नप्रवृत्तानामिन्द्रियाणां प्रत्याहार इति यावत्, एतत्प्रकर्ष एतदनायाससाध्यत्वलक्ष्मेति ज्ञेयम्। यथाभिहितम् - तदिमे विषयाः किलैहिका, न मुदे केऽपि विरक्तचेतसाम्। परलोकसुखेऽपि निःस्पृहाः, परमानन्दरसालसा अमी- इति **(अध्यात्मसारः)**।

तथा तीव्रः **शमः** - अपराधेऽप्यकोपान्वया प्रकृतिक्षान्तिगुणसंवलिता चित्तवृत्तिः, तदुक्तम्- अवरज्झे वि ण कुप्पइ उवसमओ सव्वकालंपि - इति **(सम्यक्त्वसप्ततिः)**। तथा तीव्रं **सम्यक्त्वम्** - शङ्काद्यतिचाररहितमुपशमादिगुणाभिव्यङ्ग्य

आत्मपरिणामः। तथा **मैत्री** - विश्वविश्वसत्त्वहितमतिः, यदुक्तम् - मैत्री परस्मिन् हितधीः समग्रे - इति (**शान्तसुधारसः**)। तथा तीव्रः **संवेगः** - स्वर्गादिसुखगोचरदुःखैकमतिहेतुके मोक्षसुखमात्रगताभिलाषातिशयस्वरूपः स्वपरिणामः, उक्तश्च - णरविबुहेसरसोक्खं दुक्खं चिय भावओ उ मन्नंतो। संवेगाओ मोक्खं मोत्तुण अन्नं न पत्थेइ - इति (**दर्शनशुद्धिः**)।

तथा तीव्रो **विवेकः** - सततमपि सार्वानुशीलनम्, तद्धेतुत्वात्तस्य, तदाह- विवेकश्च नैरन्तर्येण भगवद्वचनपरिभावनम्

**(सामाचारीप्रकरणम्)**। अतो हि पारमर्षपरिणतिः, ततोऽपि स्वेतरभेदविज्ञानसंवेदनम्, सोऽयं विवेकः पोतभूतोऽपारसंसारपारावारपारप्रापणे।

तथा **तीव्रनिर्वेदः** - प्रकर्षप्राप्तो भवविरागः, यतः पश्यत्यनर्थतयाऽर्थम्, शवोपमां स्त्रीविलाससन्ततिम्, विषसदृशांश्च विषयान्, परमार्थतोऽस्यात्मसुखसंवित्तिरूपत्वात्। भवति हि प्रकर्षं पश्यतोऽपकृष्टावज्ञेति न किञ्चिदत्र चित्रम्, उक्तश्च - अर्थो ह्यनर्थो बहुधा मतोऽयं, स्त्रीणां चरित्राणि शवोपमानि। विषेण तुल्या

(आचाराङ्गम्)।

अथ प्रोक्तबीजाङ्कुरभाव एवास्माकं विप्रतिपत्तिः, विषयप्रवृत्त्यादेः सुखान्वेषण-रूपत्वादात्मज्ञानस्य च सदवबोधरूपत्वात्। अतो न सम्भवत्यनयोर्बाध्यबाधकभावः। एवञ्च विषयप्रवृत्तिपरिहाररूपस्य दमस्य कार्यत्वम्, तत्कारणत्वं चाऽऽत्मज्ञानस्येति न सङ्गतिमङ्गतीति चेत् ? अत्राह-

**जो जाणइ अप्पाणं,**
**अप्पाणं सो सुहाणं न हु कामी।**
**पत्तम्मि कप्परुक्खे रुक्खे**
**किं पत्थणा असणे ?॥४॥**

**य आत्मानं जानाति** - विहसित-स्वयम्भूरमणजलधिजलसम्भारोऽनन्ताऽऽ-नन्दरसो मत्स्वरूपमिति संवेत्ति, **स आत्मनः सुखानां नैव कामी,** नास्य तुच्छतमहृषीकगोचरोपभोगप्राप्यसुखाभा-साभिलाषा स्वप्नेऽपि सञ्जायत इति हृदयम्।

अत्र निदर्शनमाह- **कल्पवृक्षे प्राप्ते सति किमृक्षेऽशने प्रार्थना** सम्भवति ? नैव सम्भवति कस्यचिदमूढस्येत्यभिप्रायः। उक्तश्च - तावत् सुखेच्छा विषयार्थभोगे यावन् मनःस्वास्थ्यसुखं न वेत्ति। लब्धे

अनात्मज्ञस्य त्वास्तां मुक्तिसुखम्, इतरदपि दुर्लभमित्याह-

**तेसिं दूरे सिद्धी**
**रिद्धि रणरणयकारणं तेसिं।**
**तेसिमपुण्णा आसा,**
**जेसिं अप्पा न विन्नाओ॥६॥**

**तेषां सिद्धिर्दूरे**, न मुक्तिगतिगन्धोऽपि तेषामिति भावः। **तेषामृद्धी रनरनककारणम्**, मनःसन्तापादिप्रसूतया परमार्थतो विभवोऽपि तेषां दुःखैकहेतुरेवेति हृदयम्। किञ्च **तेषामाशाऽपूर्णा** एवाऽऽस्ते, नैहि-

कविषयाभिलाषाऽपि तेषां पूर्यत इत्याशयः। केषामित्यत्राऽऽह- **येषामात्मा न विज्ञातः**, एतदज्ञस्याधर्मप्रवृत्तेः, तस्याश्च दुःखनिदानत्वात्, उक्तश्च - धर्मफलमनुभवतोऽप्यधर्मानुष्ठानमनात्मज्ञस्य - इति (नीतिवाक्यामृतम्)।

एवञ्च यावत् सिद्धिसुखमप्यात्मज्ञानाधीनमेवेत्याह-

**ता दुत्तरो भवजलही-**
**ता दुज्जेओ महालओ मोहो।**
**ता अइविसमो लोहो,**
**जा जाओ न निओ बोहो॥७॥**

**सोऽपि कामः** - मथिताशेषजगज्जनो मन्मथः अध्यात्मध्यानज्वलने - स्वरूपमात्रगोचरैकाग्रचित्तसन्ततिलक्षणजाज्वल्यमानज्वालावलिमालिहुताशने, **पतङ्गत्वं प्रयाति**, शलभवद् भस्मभूयं प्रपद्यत इति भावः। परस्वत्वोन्मादप्रभवो हि मदनः, स च स्वस्वत्वसंवित्तिसद्भावे विलीयेतैव, मदनवदिति भावः। किञ्च

**जं बद्धं पि न चिट्ठइ,**
**वारिज्जंतं वि सरइ असेसे।**
**ज्ञाणबलेणं तं पि हु,**
**सयमेव विलिज्जइ चित्तं॥९॥**

**यद् बद्धमपि न तिष्ठति**, प्रयत्नत आत्माभिमुखं नीतमपि भ्राम्यत्येव बहिस्तात् पुंश्चलीवेत्यर्थः। **वार्यमाणमप्यशेषानस्मरणीयानपि स्मरति** भावान् ये बहिः प्रादुष्क्रियमाणा अपि जुगुप्सां लज्जां च जनयेरन्, **तदपि तु चित्तं ध्यानबलेन स्वयमेव विलीयते** - आत्मरसैकरसीभावमनायासेनैव प्रतिपद्यते, उन्मनीभावस्यापि ध्यानसाध्यत्वादिति भावः। अत एव-

**बहिरंतरंगभेया विविहा**

**वाही न दिंति तस्स दुहं।**

निरपराधश्च, विषयाशाकषायोदयविमुक्त-त्वात्। अतोऽस्य पीडोपनिपाताभावः प्रायः।

**अथवा** प्राक्कृतक्लिष्टकर्मवशेन कोऽपि तं पीडयति, तदाऽपि **तस्मात्** - दारुणादपि हननादिप्रकारात् पीडनात्, तस्य **दुःखम्** - मनःकष्टम्, **नास्ति**-नैवोदयमा-साद्यते, अत्रैव हेतुगर्भितं विशेषणमाह- **ऋणमोक्षं मन्यमानस्य** - इति। प्राक्कृत-कर्म ह्यात्मन ऋणम्। पीडनपरेण हि तदु-दीर्यते प्रसह्य, ततश्चोदयमासाद्य निर्जीर्यते तत्। एवञ्चर्णमुक्तिरेव मम सञ्जायतेऽनेने-

त्यभिसन्दधत आनन्दवृद्धिमेवाधिगच्छतः को दुःखावकाशः ? प्रतिकूलेऽपि संयोग इष्टसिद्धिं प्रपश्यतस्तद्विरहात्, उक्तञ्च-दृष्टा चेष्टार्थसंसिद्धौ कायपीडा ह्यदुःखदा। रत्नादिवणिगादीनां तद्वदत्रापि भाव्यताम् - इति **(अष्टकप्रकरणम्)**।

यत्किञ्चिन्निमित्तमपि प्रबुद्धस्य महात्मनः सुखायैव जायते, प्रबोधप्रमोदयोः परमार्थतोऽनर्थान्तरत्वात्, अबोधो ह्यसुखबीजम्, तस्मिन् प्रबोधपावकदग्धे का दुःखप्ररोहप्रसूतिरेवेति। अभिहितञ्चाभियुक्तैः - दुःखं दुष्कृतसङ्क्षयाय महतां,

क्षात्यै पदं वैरिणः, कायस्याशुचिता विरागपदवी, संवेगहेतुर्जरा। सर्वत्यागमहोत्सवाय मरणं, जातिः सुहृत्प्रीतये, सम्पद्भिः परिपूरितं जगदिदं स्थानं विपत्तेः कुतः ? - इति **(सूत्रकृताङ्गवृत्तावुद्धरणम्)**।

इतश्चास्य दुःखापनोद इत्याह-

**दुक्खाण खाणी खलु रागदोसा**
**ते हुंति चित्तम्मि चलाचलंमि।**
**अज्झप्पजोगेण चएइ चित्तं**
**चलत्तमालाणिअकुंजरु व्व॥१२॥**

**रागद्वेषौ खलु दुःखानां खनिः**

दुःखविटपिमूलकर्मबीजत्वात्तयोः, तथा च पारमर्षम्- रागो य दोसो वि य कम्मबीयं, कम्मं च जाइप्पभवं वयंति। कम्मं च जाइ-मरणस्स मूलं, दुक्खं च जाईमरणं वयंति- इति **(उत्तराध्ययनम्)**। **तौ** - रागद्वेषौ, **चलाचले** - सन्ध्याभ्ररागवत्परिचञ्चले, **चित्ते** - अनात्मज्ञान्तःकरणे, **भवतः** - बाह्यनिमित्तभावे तदभावे वाऽपि तथा-तच्चित्तस्वाभाव्यादुद्भवमाप्नुवतः।

किमेतच्चलत्वोच्चाटनोपाय इत्यत्रा-ऽऽह- **अध्यात्मयोगेन** - स्वभावपरिभाव-नैकानुसन्धानेन, **चित्तं चलत्वं त्यजति**

अध्यात्मयोगचित्तचाञ्चल्ययोः सामानाधिकरण्यासम्भवात्। चलत्वपरिहार उपमामाह- **आलानितकुञ्जर इव**। यथैव बन्धनस्तम्भबद्धो गजस्त्यजति तरलताम्, तथैवाध्यात्मयोगप्रोतं मनोऽपीति भावः।

न च चञ्चलस्वभावं चित्तं कथन्नामाचलं स्यादिति वाच्यम्, तस्यात्मपरिणामरूपत्वात्, छद्मस्थस्यात्मन उभयरूपस्य सिद्धान्तसिद्धत्वादानुभविकत्वाच्च। एतदेव स्पष्टतरमाचष्टे -

**एसो मित्तममित्तं एसो**
**सग्गो तहेव नरओ अ।**
**॥ ३० ॥**

एसो राया रंको अप्पा

तुट्ठो अतुट्ठो वा॥१३॥

**एष आत्मा तुष्टः** - स्वगुणानुगुणप्रवृत्त्या परितोषितः सन् **मित्रम्** - सुहृदिव हितकृत्, अतुष्टो वा स्वगुणप्रतिलोमप्रवृत्त्याऽपरितोषितस्त्वेष एवाऽ-**मित्रम्**- क्रुद्धरिपुरिव प्रत्यपायैकसविता। एवं स्वर्गादावपि वाच्यम्, तुष्टाद्यात्मनस्तद्धेतुत्वात्, यत् पारमर्षम् - अप्पा कत्ता विकत्ता य सुहाण य दुहाण य। अप्पा मित्तममित्तं च सुप्पट्ठिअ दुप्पट्ठिओ॥ अप्पा नई वेयरणी अप्पा मे कूडसामली। अप्पा

कामदुहा धेणु अप्पा मे नंदणं वणं - इति **(उत्तराध्ययनम्)**। एतदेवाभिप्रेत्यान्यत्रापि - अप्पा सुगइं साहइ सुप्पउत्तो दुग्गइं च दुप्पउत्तो। तुट्ठो रुट्ठो अपरो न साहगो सुगइकुगईणं इति **(पुष्पमाला)**।

एवमात्मन एव सुख-दुःखस्वर्गनरकादिरूपत्वात्तदनवगमं हित्वा तदवबोधे यतितव्यम्, अन्यथा प्रत्यपायानपायादिति भावः, उक्तञ्च-त्वमेव दुःखं नरकस्त्वमेव, त्वमेव शर्मापि शिवस्त्वमेव। त्वमेव कर्मापि मनस्त्वमेव जहीह्यविद्यामवधेहि चाऽऽत्मन् - इति **(अध्यात्मकल्पद्रुमः)**।

न हि परितोषितलोकस्याप्यात्मपरितोषमन्तरेण समीहितसिद्धिरिति तदर्थमेव प्रोत्साहयति -

**लद्धा सुरनररिद्धी विसया**
**वि सया निसेविआऽणेण।**
**पुण संतोसेण विणा किं कत्थ**
**वि णिव्वुइ जाया ?॥१५॥**

**अनेना**ऽऽत्मनाऽनादौ संसारेऽनन्तशः **सुरनरर्द्धिर्लब्धा** - तथाविधपुण्यविपाकादधिगता। न चैतन्मात्रम्, अपि तु **विषया** अप्यात्मना **सदा निषेविताः**। **पुनः** -

तथाऽपि **सन्तोषेण** - परितृप्त्या **विना किं कुत्रापि** भवे **निर्वृतिः** - अगौणसुखपरिस्पर्शः, **जाता** ? - नैव जाता, सन्तोषसारत्वात्सुखानाम्, तदुक्तम् - सुहाइं संतोसाराइं - इति।

नन्वप्राप्तसुखत्वेऽलब्धर्द्धित्वमेवाऽस्त्विति चेत् ? न, साम्प्रतकालेऽपि समृद्धानां दुःखित्वदर्शनात्, अतीतजन्मर्द्धिप्राप्तेः पारमर्षप्रसिद्धत्वाच्च, तदुक्तम्- देविंदचक्कवट्टित्तणाइं रज्जाइ उत्तमा भोगा। पत्ता अणंतखुत्तो ण य हं तत्तिं गओ तेहिं - इति, सव्वाओ रिद्धिओ पत्ता - इति च (**वैराग्य-**

शतकम्)। अतो न किञ्चिदनुपपन्नम्, भवस्य जीवस्य चानादित्वात्।

अत आत्मगुणानुगुणप्रवृत्त्या परितोष्योऽयमात्मा, व्यर्थत्वात्कुटुम्बादितोषणस्य, उक्तञ्च- तोषणीयो जगन्नाथस्तोषणीयश्च सद्गुरुः। तोषणीयस्तथा स्वात्मा किमन्यैः बत तोषितैः - इति (योगसारः)। अपरथा तु यद् भावि तदाह-

**जीव ! सयं चिय निम्मिअ-**
**तणुघररमणीकुटुंबनेहेणं।**
**मेहेण व दिणनाहो**
**छाइज्जसि तेअवंतो वि॥१६॥**

**जीव ! स्वयमेव निर्मिततनुगृह-रमणीकुटुम्बस्नेहेन** त्वं **तेजस्वानपि** ज्ञानप्रकाशदीप्तोऽपि छाद्यसे तिरोभवसि। एतदेव निदर्शयति **मेघेनेव दिननाथः** - सूर्यः।

जीव एव निर्माति शरीरादिस्नेहम्, छाद्यते च तेनैव स्वयम्, सुखाद्यात्मगुण-छादनस्वभावत्वात्स्नेहस्य, यदुक्तम् - सम्बन्धान् कुरुते जन्तुर्यावत आत्मनः प्रियान्। तावन्तस्तस्य जायन्ते हृदये शोक-शङ्कवः - इति। अतः प्राक् शरीरस्नेहम-पसारयति-

**वरभत्तपाणण्हाणय-**

**सिंगारविलेवणेहिं पुट्ठो वि।**

**निअपहुणो विहडंतो सुणएण**

**वि न सरिसो देहो॥१७॥**

**वरभक्तपानस्नानकशृङ्गारविलेपनैः पुष्टोऽपि निजप्रभोर्विघटन् देहो न शुनाऽपि सदृशः।** कुर्क्कुरोऽपि तावत्तुच्छ-भक्तादिना परितर्पितः कृतज्ञो भवति स्वामिनं प्रति, प्राणांश्च प्रत्यर्पयत्यवसरे, न च विघटति ततः। देहस्तु ततोऽप्यधमतरः, रोगजरामरणावसरेषु तत्कृतात्मद्रोहस्य दृष्ट-चरत्वात्, अभिहितश्च - आहारगंधमाईएहिं

सुअलंकियो वि पुट्ठो वि। देहो न सुई न थिरो विहडइ सहसा कुमित्तु व्व- इति (पुष्पमाला)। धनप्रतिबन्धमपनयति-

**कट्ठाइ कडुअ बहुआ**
**जं धणमावज्जिअं तए जीवा।**
**कट्ठाइं तुज्झ दाउं,**
**तं अंते गहिअमन्नेहिं॥१८॥**

**जीव ! यत्त्वया बहुधा** - सागरपार-गमनादिप्रभूतप्रकारेण, **कष्टानि कृत्वा धनमावर्जितम्**- उपार्जितम्, **तदन्ते**-ऽन्यैः- दायादादिभिः **तुभ्यं कष्टानि दत्त्वा**

गृहीतम्। एवञ्च सर्वथाऽपि कष्टनिदानमेव तव धनम्, अतो विमुञ्च ततः सुखाशालेशमपि, अन्वाह- अर्थानामर्जने दुःखमर्जितानां च रक्षणे। आये दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् - इति। ततो न कोऽपि तव गुणो धनादिपरिग्रहादन्यत्र दुःखोदधिनिमज्जनादित्याह-

**जह जह अन्नाणवसा**
**धणधन्नपरिग्गहं बहुं कुणसि।**
**तह तह लहुं णिमज्जसि**
**भवे भवे भारिअतरि व्व।।१९।।**

**यथा यथा** - येन येन सदसत्प्रकार-

विशेषेण, **अज्ञानवशाद् बहुं धनधान्य-परिग्रहं करोसि, तथा तथा भवे भवे भारिततरीव** - भारातिशयगुरूभूतपोतवत्, **लघु** - शीघ्रमेव **निमज्जसि**, न स्व-रक्षणावकाशमपि प्राप्स्यसीति भावः।

अज्ञानवशादेव भवति परिग्रहः, ज्ञा-निनस्तद्विरहात्। तद्रूपपरिणतिर्हि तात्त्विकः परिग्रहः, तत्स्वरूपवेत्ता च ज्ञानी, अतः कोऽस्य परिग्रहाभिमान इति, तदुक्तम् - मज्झ परिग्गहो जइ तोऽहमजीवत्तं तु गच्छेज्ज। णादेव अहं जम्हा तम्हा ण परिग्गहो मज्झ - इति (**समयसारः**)। अथ

रामारतिं निरसति-

**जा सुविणे वि हु दिट्ठा**
**हरेइ देहीणं देहसव्वस्सं।**
**सा नारी मारी इव**
**चयसु तुह दुब्बलत्तेणं॥२०॥**

**या स्वप्नेऽपि तु दृष्टा** सती **देहिनाम्**- स्वप्नदृष्टजीवानाम्, **देह-सर्वस्वम्**- शरीरसामर्थ्यानन्यप्रयोजकं वीर्यम्, **हरति**, तदपहारनिमित्तत्वं भजत इत्यर्थः, **सा नारी मारिरिव**, बलाधीन-त्वाज्जीवनस्य तदपहर्त्री साक्षान्मृतिरेवेति भावः। अतस्तां **त्यज, तव दुर्बलत्वेन,**

तदत्यागो हि तव शिष्टबलक्षयपर्यवसायीत्यतस्त्याज्यैव सेति भावः, तथा चार्षम्-

जो सेवइ किं लहइ थामं हारेइ दुब्बलो होइ। पावेइ य वेमणस्सं दुक्खाणि य अत्तदोसेणं - इति (उपदेशमाला)। अपि च-

**अहिलससि चित्तसुद्धिं रज्जसि**
**महिलासु अहह मूढत्तं।**
**नीलीमिलिए वत्थंमि धवलिमा**
**किं चिरं ठाइ ?॥२१॥**

त्वं **चित्तशुद्धिमभिलषसि, महिलासु** च **रज्यसि,** तद् **अहह** तव

**मूढत्वम्**। मौढ्यमेवैतद् दृष्टान्तेन स्पष्टयति- नीलीमिलिते वस्त्रे **धवलिमा** - श्वैत्यं **किं चिरम्**- कियन्तं कालं यावत् **तिष्ठति** ? नीलीमिलनमात्रेणैव यथा विनश्यति वस्त्रश्वैत्यम्, तथा नारीरागमात्रेणैव तव चित्तशुद्धिविनाशः, चित्तकालुष्यस्य प्रबलतमनिमित्तत्वाद्योषिताम्, अत एवाऽऽर्षम् - असज्जमित्थिसु- इति (आचाराङ्गम्)। अथ स्वजनस्नेहमधिकृत्याऽऽह-

**मोहेणं भवदुरिए बंधिअ**
**खित्तो सि नेहनिगडेहिं।**
**॥ ४३ ॥**

**बंधवमिसेण मुक्का पाहरिआ**

**तेसु को राओ ?॥२२॥**

**मोहेन स्नेहनिगडैः** त्वां **बद्ध्वा भवचारके** त्वं **क्षिप्तोऽसि**। तत्र च बान्धवमिषेण प्राहरिका मुक्ताः। **कस्तेषु** तव विदितपरमार्थस्य **रागः** ? नैव स सङ्गतिमङ्कतीति भावः। यथा हि यामिक-वशान्न मोक्षं लभते चारकगते । जनः, तथैव स्वजनवशादपि भवकारावासनियन्त्रितो जीवः, अतः कथन्न स्वजनानां यामि-कौपम्यम् ? उक्तञ्च-यामिकभटोपमः स्वीयो वर्गः - इति **(अध्यात्मसारः)**। यतनीय-

मतोऽन्तःकुटुम्बे, भवविमुक्तिहेतुत्वात्तस्ये-त्याह-

**धम्मो जणओ करुणा माया**
**भाया विवेगनामेणं।**
**खंति पिआ सप्पुत्तो गुणो**
**कुटुंबं इमं कुणसु॥२३॥**

**धर्म** एव **जनकः**, सुखात्मकात्म-परिणामपितृभूतत्वात्। **करुणा** च **माता**, निसर्गवत्सलत्वात्। **विवेकनाम्ना** तु **भ्राता**, सर्वापत्सु संरक्षकत्वात्। **क्षान्तिश्च प्रिया**, एकान्तकान्तत्वात्। **सत्पुत्रस्तु**

**गुणः**, आ भवमपि सम्यक् परिपालक-त्वात्। अत **इदमेवाऽऽभ्यन्तरं कुटुम्बं कुरुस्व** - आत्मीयतया मन्यस्व। उक्त-श्चान्यत्र प्रकारान्तरेण - संयताऽऽत्मा श्रये शुद्धोपयोगं पितरं निजम्। धृतिमम्बां च पितरौ तन् मां विसृजत ध्रुवम्॥ युष्माकं सङ्गमोऽनादि-र्बन्धवोऽनियतात्मना। ध्रुवैकरूपान् शीलादिबन्धून्नित्यधुना श्रये॥ कान्ता मे समतैवैका ज्ञातयो मे समक्रियाः। बाह्यवर्गमिति त्यक्त्वा धर्मसन्न्यासवान् भवेत् - इति (**ज्ञानसारः**)।

स्वजनेष्वपि भार्यास्वेव तीव्रतरो

भवति प्रायः स्नेहः, अतस्तमपाकर्त्तुमाह-

**अइपालियाहिं पगइत्थियाहिं**
**जं भामिओ सि बंधेउं।**
**संते वि पुरिसकारे**
**न लज्जसे जीव तेणंपि॥२४॥**

**अतिपालिताभिः** - स्वयमन्तप्रान्तं भुक्त्वाऽपि मिष्टस्निग्धाहारविशिष्टवस्त्राऽऽ-भरणादिभिर्बाढमुपचरिताभिः, प्राकृत-स्त्रीभिः विशिष्टकुलकलारूपादिविहीन-विलयाभिरपि, **यत्त्वमस्थानस्नेहपाशैर्बद्ध्वा भ्रामितोऽसि** - अशुचिशुचिप्रभृतिभ्रान्ति-प्रापणेन व्युद्ग्राहितोऽसि, यद्वा तत्तत्कार्य-

करतया व्यापृतोऽसि, **सत्यपि पुरुषकारे**, अयं भावः - यदि हि त्वं स्त्रीप्राय एवाबलोऽभविष्यस्तदा न किमप्यस्माभिर्वाच्यमभविष्यत्। किन्तु त्वं तु पुरुषकारसम्पन्नः, तथाऽप्येवं कदर्थ्यस इति।

**जीव ! तेनापि** - अनन्तराभिहितात्मकदर्थनेनापि **न लज्जसे**। तदेतत्तव निर्ह्रीकत्वातिरेक एवेत्याशयः। उक्तश्च - पासेण पंजरेण य बज्झंति जह चउप्पया य पक्खी य। इय जुवइपंजरेण बद्धा पुरिसा किलिस्संति॥ हरिहरचउराणण- चंदसूरखंदाइणो वि जे देवा। नारीणं किंकरत्तं

कुणंति धीद्धी विसयतिण्हा - इति (इन्द्रिय-पराजयः)। तदेवम् -

**सयमेव कुणसि कम्मं,**
**तेण य बाहिज्जसि तुमं चेव।**
**रे जीव ! अप्पवेरिअ !**
**अन्नस्स य देसि किं दोसं ?॥२५॥**

**त्वं स्वयमेव कर्म** - स्त्रीसक्त्यादि-लक्षणासदनुष्ठानोपार्जितज्ञानावरणादि, **करोसि** - उपेत्य स्वरसतो विधत्से, तेन च कर्मणा **त्वमेव बाध्यसे**, कर्त्रेकानुयायि-त्वात्कर्मणः, यदार्षम्- कत्तारमेव अणुजाइ

कम्मं - इति (उत्तराध्ययनम्)।

**रे जीव ! आत्मवैरिक ! किमन्यस्य च दोषं ददासि ?** स्वकृतकर्मभोजित्वात्तव मुधैवान्यदोषप्रदानमिति हृदयम्। उक्तञ्च - अन्नो न कुणइ अहियं हियं पि अप्पा करेइ न हु अन्नो। अप्पकयं सुह दुक्ख भुंजसि ता कीस दीणमुहो ? - इति (वैराग्यशतकम्)। अपि च-

**तं कुणसि तं च जंपसि तं**
**चिंतसि जेण पडसि वसणोहे।**
**एयं सगिहरहस्सं न**
**सक्किमो कहिउमन्नस्स॥२६॥**

**तत् करोषि** सावद्यानुष्ठानम्, **तच्च जपसि** वितथत्वादिदोषदुष्टं वचः, **तत्** च **चिन्तयसि** अकुशलविमर्शम्, **येन** त्वं **व्यसनौघे**, दुःखशतसहस्रसन्दोहे **पतसि**, कृतमनोवाक्कायकर्ममोक्षाभावात्, तदुक्तम् - कडाण कम्माण न मोक्खु अत्थि- इति **(उत्तराध्ययनम्)**।

**एतत्** - स्वयं स्वदुःखनिदानमामन्त्र्य तद्विषहनलक्षणम्, तव **स्वगृहरहस्यम्** वय-**मन्यस्य कथयितुं न शक्नुमः**, लज्जनीय-तया गोप्यत्वेनास्मद्विधानां तत्प्रकाशनधा-ष्टर्याभावात्। वरं स्याद्यदि त्वमेवैतद्विचित्र-

चरित्रपरित्यागं कुर्या इत्याशयः। किञ्च -

**पंचिंदिय परा चोरा**

**मणजुवरन्नो मिलित्तु पावस्स।**

**निअनिअअत्थे निरता**

**मूलट्ठिइं तुज्झ लुंपंति॥२७॥**

**पराः** - पश्यतोहरत्वेन निकृष्टतमाः, **चौराः**, क इत्याह- **पञ्चेन्द्रियाणि**, तत्तदौपम्यं चरणधनलूण्टाकत्वात्, यदुक्तम् - सुच्चिय सूरो सो चेव पंडिओ, तं पसंसिमो णिच्चं। इंदियचोरेहिं सया ण लूंटियं जस्स चरणधणं - इति। एतदेवाऽऽह- ते च

**पापस्य** - सर्वपापनिदानत्वेन सपाप्मनः, **मनोयुवराज्ञो मिलित्वा निजनिजार्थे** शब्दादौ **निरताः** - सन्ततमपि तदन्वेषणैकपरायणाः, तव चौरसुहृन्निर्विवेकस्य **मूलस्थितिम्**- सर्वसारभूतज्ञानादिमूलद्रव्यसत्ताम्, **लुम्पन्ति** - समन्ताद्विनाशयन्ति, अत आत्मानुपालनार्थं समाहितेन्द्रियो भव, अन्यथा दारुणभवबम्भ्रमणस्य व्रजलेपायमानत्वात्, समाधेश्च सिद्धिसश्चरत्वात्, तदाहुः - अप्पा खलु सययरक्खियव्वो सव्विंदिएहिं सुसमाहिएहिं। अरक्खिओ जाइपहं उवेइ सुरक्खिओ सव्व-

दुहाण मुच्चइ - इति (**दशवैकालिकम्**)।

यदियत्कालं यावद् विहितमिन्द्रियत-स्करैस्तदाह-

**हणिओ विवेगमंती भिन्नं**
**चउरंगधम्मचक्कंपि।**
**मुट्ठं नाणाइधणं**
**तुमंपि छूढो कुगइकूवे॥२८॥**

विवेक एव मन्त्री - **विवेकमन्त्री** अध्यात्मनगरसर्वकार्यप्रधानत्वात्, स हृषीकस्तेनैः **हतः** - अयमेवास्मन्नियन्त्र-णैकनिपुण इति मन्वानैर्मृतिं नीतः।

दुर्दान्तचौरवशीकारविधौ सेनाऽपि कदाचिदुपयुज्यत इति नीतिं विज्ञायेतै **चतुरङ्गधर्मचक्रमपि** - हस्त्यादिस्थानीयदानादिचतुर्भेदसचिवा धर्मवाहिन्यपि, **भिन्नम्**- तत्तदतिचारादिसम्पादनक्रमेणानाचाराऽऽचरणमुपनीय मूलतोऽप्युन्मूलितम्।

ततोऽपि साधितमेभिर्निरर्गलं स्वसाध्यम्, प्रतिबन्धकविरहादित्याह- **ज्ञानादिधनम्** - सदवबोधरत्नाद्यात्मसर्वस्वम्, **मुष्टम्**- सर्वबलभ्रष्टतया प्रतिकारलेशविकलस्य विपर्यस्तमतेः प्रत्युत

परितोषं दर्शयत आत्मनः सकाशाच् चौरितम्।

स्तेनोऽपि विहितस्तैन्यः पुनर्दण्डभीत्या मुषितस्य तथा नियन्त्रणं कुरुते, यथाऽसौ राजकुलादौ गन्तुमेव न पारयतीत्येतेऽपि यच्चक्रुस्तदाह- **त्वमपि कुगतिकूपे क्षिप्तः**, यथैकेन्द्रियादिदीर्घकायस्थित्यवस्थिततयाऽन्धकूपप्रक्षिप्तो नामापि विस्मरेद्धर्मराज्ञः, दूरे तद्दर्शनं स्वविडम्बननिवेदनं वा। इत्थञ्च-

**इत्तिअकालं हुंतो**

**पमायनिद्दाइगलियचेअन्नो।**

**जइ जग्गिओसि संपई**

**गुरुवयणा ता न वेएसि ॥२९॥**

**इयन्तम्** - अनन्तपुद्गलपरावर्त्त-प्रमाणम् **कालं** यावत् त्वं **प्रमादानिद्रादिगलितचैतन्योऽभवत्**। विवेकः खल्वात्मचैतन्यम्, तच्च विनश्यत्येव प्रमादनिद्रादिविपक्षव्यासेवनतः, गोक्षीरमिवाम्लद्रव्यात्।

तद् **यदि सम्प्रति गुरुवचनात्**-साक्षीत्तीर्थकृत्सङ्काशनिष्कारणवत्सलधर्माचार्यवाणीपीयूषात्, **जागृतोऽसि** - निर्धूत-

प्रमादनिद्रतया सम्प्राप्तचैतन्योऽसि, **ततः** विवेकोदयविहितमहाभ्युदयवशात् पुनस्त-थाविधनिगोदादिजन्मसन्ततिव्यथां **न वेद-यसि**, मूलं नास्ति कुतः शाखेतिन्यायात्, प्रमादमूलत्वाद्दारुणभवबम्भ्रमणस्य। किञ्च-

**लोगपमाणो सि तुमं,**
**नाणमओऽ णंतवीरिओ सि तुमं।**
**नियरज्जठिइं चिंतसु,**
**धम्मज्झाणासणासीणो॥३०॥**

**त्वं लोकप्रमाणोऽसि**, चतुर्दशरज्जू-मितलोकाकाशप्रदेशतुल्यप्रदेशत्वादात्मनः,

मुञ्चाहङ्कारमतः क्षुद्रशरीरादाविति भावः।

इतोऽपि तव पौद्गलिकत्वविरह इत्याह- **ज्ञानमयः** - सर्वविजातीयविलक्षणचिन्मात्रलक्षणः, उक्तञ्च - पुद्गलानां गुणो मूर्त्तिरात्मा ज्ञानगुणः पुनः। तद् भिन्नं पुद्गलद्रव्यादात्मद्रव्यं जगुर्जिनाः - इति **(अध्यात्मसारः)**, तथा**ऽनन्तवीर्योऽसि त्वम्**, अपर्यवसितज्ञेयज्ञप्तिशक्तिसम्पन्नत्वात्।

अतो, **धर्मध्यानासनासीनः** सन् **निजराज्यस्थितिं** - सर्वलौकिकराज्यातिशय्यध्यात्मसाम्राज्यसत्काद्भुतगुणगरिम-

परिपूतसत्ताम्, **चिन्तय**- तत्स्वरूपादिपरि-
भावनपुरस्सरं ध्यानगोचरीकुरु। अपि च -

**को व मणो जुवराया ?**
**को वा रायाइ रज्जपब्भंसे ?।**
**जइ जग्गिओ सि संपइ,**
**परमेसर पविस चेअन्ने॥३१॥**

यदि हि त्वमधिष्ठित एवाध्यात्म-साम्राज्ये, तदा भ्रष्ट एव मोहराजा, अत एवम् **राज्यप्रभ्रंशे** सति, **को वा युवराजा मनः** ? को वा **राजादिः** मोहप्रभृतिरपि न किञ्चित्ते, तावदेव खद्योतविलसितम्,

यावन्न दिवाकरोदयः, तावदेव मोहराज्य-स्फातिः, यावन्न तव विवेकोदय इति हृदयम्।

अतो **यदि सम्प्रति जागृतोऽसि**, तदा हे **परमेश्वरः** - ज्ञानाद्यनन्तैश्वर्यसम्पन्न ! त्वं **चैतन्ये प्रविश** - स्वस्वरूपमात्रानुप्रवेशं विधत्स्व, दृष्टविपाकत्वात्तवेतरप्रवेशस्य। एतदेव स्मारयति-

**नाणमओ वि जडो विव पहू**
**वि चोरु व्व जत्थ जाओ सि।**
**भवदुग्गंमि किं तत्थ**
**वससि साहीणसिवनगरे।।३२।।**

**यत्र भवदुर्गे** निवसन् त्वं **ज्ञानमयोऽपि जड इव** जातोऽसि, हिताहितप्राप्तिपरिहारफलं हि ज्ञानम्, तत्फलाभावश्च हेत्वभावं समर्थयन् जडत्वमेव तव साधयतीत्येषा स्वरूपापहारविडम्बना तव। अहो तव निर्लज्जतेत्येतादृशदुःस्थितावपि सुस्थ इव तिष्ठसि।

अपि च यत्र **प्रभुरपि चौर इव जातोऽसि** त्वम्। प्रभुता च तव निरर्गलज्ञानदर्शनादिगुणगणविभुत्वालङ्कृतत्वात्, निरवधिसुखसन्दोहस्वामित्वाच्च। चौरत्वं तु तत्तत्प्रभुत्वसम्भ्रष्टतया यत्किञ्चित्तुच्छ-

परिमोषानुगतचित्तत्वात्।

**स्वाधीनशिवनगरे सति तत्र** भवदुर्गे **किं वससि** ?, त्वदधीनमेव शिवनगरम्, त्वत्पुरुषार्थप्राप्यत्वात्तस्य, तच्च स्वरूपतया तव गृहस्थानम्, अतस्तदुपेक्ष्य दुःखैकनिलये भवदुर्गे तव निवासोऽनुचित एवेति प्रयतस्व शिवनगरसम्प्राप्तौ, स्तोकावशिष्टत्वात्तन्मार्गस्येत्याशयः, तथा च पारमर्षम्-तिण्णोऽसि अण्णवं महं किं पुण चिट्ठसि तीरमागओ ?। अभितूर पारं गमित्तए समयं गोयम मा पमायए - इति **(उत्तराध्ययनम्)**।

यद्येतावताऽपि नोल्लसति मनो भवदुर्गपरित्यागार्थम्, तदेतत्स्वरूपाज्ञत्वा-देवेत्येतत्स्वरूपं समाचष्टे -

**जत्थ कसाया चौरा**
**महावया सावया सया घोरा।**
**रोगा दुट्ठभुअंगा**
**आसा सरिआ घणतरंगा॥३३॥**

**यत्र** भवदुर्गे **कषायाः** - क्रोधादि-लक्षणाः **चौराः**, क्षान्त्यादिमहारत्नलूण्टा-कत्वात्। तथा **महापदः** - वधबन्धनादि-विपद्रूपाः, **सदा घोराः श्वापदाः**, समन्ता-

त्समापत्य सम्पीडनैकस्वभावत्वात्तासाम्। अपि च **रोगाः** - ज्वरकासादिरूपाः, **दुष्टभुजङ्गाः**, छलमन्विष्य दशनशीलत्वात्। तथाऽऽ**शा** - विषयतृष्णा, **घनतरङ्गा** - व्यथावीच्यभिव्याप्ता, **सरित्**। किञ्चात्र -

**चिंताडवी सकट्ठा बहुलतमा**
**सुंदरी दरी दिट्ठा।**
**खाणी गइ अणेगा**
**सिहराइ अट्ठमयभेआ॥३४॥**

**चिन्ता** - पुत्रकलत्रपरिपोषणादिगो-

चरश्चिताधिकसन्तापको विचारविसरः, सैव **सकष्टाऽटवी**, सन्मार्गभ्रंशहेतुत्वात्। **दृष्टा** चात्र **सुन्दरी** - रमणीरूपा, **बहुलतमा**-संव्याप्तसन्तमसा, **दरी** - गुहा, तन्निषण्णानां विषण्णत्वानपायात्।

तथा नरकादिरूपत्वात् **अनेका गतयः खनयः**, दुर्निष्क्रमत्वात्। **शिखराणि** चात्र **अष्टमदभेदाः**- जात्याद्यष्टाभिमानप्रकाराः, दुरुत्तुङ्गत्वात्, विनिपातैकहेतुत्वाच्च। अपि च-

**रयणिअरो मिच्छत्तं**

**मणदुक्कडओ सिला ममत्तं च।**

**तं भिंदसु भवसेलं,**

**झाणासणिणा जिअ सहेलं॥३५॥**

**मिथ्यात्वम्**- देवगुरुधर्मगोचरवि-पर्यस्ताध्यवसायः, **रजनीचरः** - राक्षसः, सर्वकदर्थनामूलत्वात्। यत्र च **मनोदुष्कृ-ततः** - चित्तपापात् समुत्पन्नं **ममत्वम्** - वपुःकुटुम्बादिगोचरममकारमतिः, **शिला** - अविरलमपि विकुट्टनप्रयोजकत्वात्, **जीव ! तम्** - अनन्तराभिहितकषायचौ-रादिमहासाध्वससङ्कुलम्, **भवशैलम्** संसारदुर्गम् - **ध्यानाशनिना** - धर्मशुक्ल-ध्यानलक्षणकुलिशेन, **सरलम्** - सुखेनैव,

**भिन्धि** - तथा चूर्णीकुरु, यथा न कदापि त्वद्गोचरोऽयं स्यादिति भावः।

अन्यथा तु सर्वाऽपि ते चातुरी वाङ्मात्रैव, ऐहिकमात्रप्रयोजनत्वेन सानुबन्धत्वद्धितासाधनत्वात्, एतदेव व्यक्तं व्याचष्टे-

**जत्थत्थि आयनाणं**
**नाणं वियाण सिद्धिसुहयं तं।**
**सेसं बहुं वि अहीयं**
**जाणसु आजीविआमित्तं॥३६॥**

**यत्राऽऽत्मज्ञानमस्ति** - आत्मस्व-

रूपतद्धिताहिताद्युपायावगमो यत्राध्यवसायविशेषे विद्यते, **तज् ज्ञानं सिद्धिसुखदम्** इति **विजानीहि**, प्रागुक्तयुक्त्याऽऽत्मज्ञानस्य पारमार्थिकस्य सिद्धिसाधकत्वनियमात्।

ननु यद्येवं तदेतरस्य का वार्त्तेत्याह- **शेषम्** - आत्मज्ञानविकलं तु **बह्वप्यधीतम्** ज्योतिःशिल्पछन्दोनिमित्तप्रभृति, **आजीविकामात्रम्** - ऐहिकनिर्वाहमात्रप्रयोजनम्, इति **जानीहि**, आत्मज्ञानविकलस्य सकलस्यापि तज्ज्ञानस्यार्थोपार्जनजनरञ्जनादावेवोपयुञ्जनात्, तथा चाऽ-

ऽसुर्यादिभावनाभावितानां देवदुर्गत्यादि-क्रमेणाऽनन्तसंसारसंसरणव्यग्राणां तेषां कः सिद्धिगतिगमनगन्धोऽपि ? ततस्तज्ज्ञान-माजीविकामात्रपर्यवसायीति युक्तमेवोक्तम्। अभिहितश्च - मोदन्ते बहुतर्कतर्कणचणा केचिज्जयाद्वादिनां, काव्यैः केचन कल्पि-तार्थघटनैस्तुष्टाः कविख्यातितः। ज्योति-र्नाटकनीतिलक्षणधनुर्वेदादिशास्त्रैः परे, ब्रूमः प्रेत्यहिते तु कर्मणि जडान् कुक्षि-म्भरीनेव तान्- इति (**अध्यात्मकल्पद्रुमः**)।

आस्तां ज्योतिरादि, पारमर्षपीयूषमपि विषायत एवाऽऽत्मावबोधविहीनानामि-

त्याह-

**सुबहु अहीअं जह जह,**

**तह तह गव्वेण पूरिअं चित्तं।**

**हिअप्पबोहरहिअस्स,**

**ओसहाओ उट्ठिओ वाही॥३७॥**

**यथा यथा सुबह्वधीतम्**, प्रभूत-सङ्ख्यान्यध्यात्मशास्त्राणि पठितानीति भावः, तथा तथा हितकारक आत्मबोधः - **हितात्मबोधः**, निबिडमोहनीयोदयसचिवज्ञानावरणोदयसहिततया तेन **रहितस्य**, **औषधात्** - भवरोगप्रशमनाज्जिनवचनात्,

**व्याधिः** - अहङ्कारादिरूपो भवरोग एव, **उत्थितः**, दुःशमनं यथा स्यात्तथाऽभ्युत्थानं प्राप्तः। उक्तश्चान्यत्र - दप्पविसपरममंतं नाणं जो तेण गव्वमुव्वहइ। सलिलाओ तस्स अग्गी समुट्ठिओ मंदपुण्णस्स- इति (पुष्पमाला)। विडम्बनान्तरमप्याह-

**अप्पाणमबोहंता,**
**परं विबोहंति केइ ते वि जडा।**
**भण परियणंमि छुहिए,**
**सत्तागारेण किं कज्जं ?॥३८॥**

केचित् **तेऽपि** - अनन्तराभिहितद-

पध्मातजीवाः, **जडाः** - तत्त्वतोऽज्ञतमाः, यत **आत्मानमबुध्यन्तः** - स्वरूपविज्ञान-विकलाः, **परं विबोधयन्ति** - परप्रति-बोधमात्राक्षणिकव्यापारा उपलभ्यन्ते।

तदेतदसमञ्जसं दृष्टान्तद्वारेण स्पष्ट-यति, **भण** - कथय, यत् **परिजने** - पुत्रादिपरिवारे, **क्षुधिते** - बुभुक्षिते सति, **सत्रागारेण** - दीनानाथरङ्कादिभ्यो भोजनदानार्थं निर्मितया दानशालया, **किं कार्यम्** ?, न किञ्चित्तेन प्रयोजनं लोको-पहासफलेनेत्यभिप्रायः। यथा प्रथमं परि-वारपोषणं विधाय तत एव सत्रागाराभियोगः

शोभास्पदतां व्रजति, एवमात्मप्रबोधं प्राप्यैव परप्रतिबोधप्रयासः क्रियमाणः शोभते, नान्यथेति भावः।

ननु विकला एव वयमात्मज्ञानेन, तथापि प्रतिबोधयामोऽपरजीवान्, भविष्यत्येतेनापि शुभयोगेन समीहितसिद्धिरस्माकम्, अतः को नामात्र दोष इति चेत् ? अत्राह-

**बोहंति परं किं वा**

**मुणंति कालं नरा पठंति सुअं।**

**ठाणमुअंति सयावि हु**

**विणाऽऽयबोहं पुण न सिद्धी॥३९॥**

केचित् **नराः परं बोधयन्ति**, परोपकारैकरसिकत्वात्, **किं वा** - यद्वा **जानन्ति कालम्**- अनागतादिः, ज्योतिरादिविद्याप्रयोगेनैष्यत्प्रभृतिभावानपि जानन्ति केचिदित्यर्थः। किञ्च केचित् **श्रुतम्**- जिनागमरूपमन्यद्वा पठन्ति। अपि च केचित् **सदापि स्थानमप्युपयन्ति**, निरन्तरमुत्कटुकाद्यासनानि सकष्टान्यभ्यस्यन्तीति भावः।

**पुनः** - तथापि, **आत्मबोधं विना** - निश्चयव्यवहारसमन्वयमात्रसाध्यशुद्धस्वरूपशाल्यहमित्यात्मविज्ञानमन्तरेण, **न** सम्भ-

वति सिद्धिः, सद्धेतौ व्यतिरेकव्यभिचार-विरहात्, अतिप्रसङ्गात्, त्रैलोक्यस्याप्येवमेव सिद्धिप्रसक्तेः, न चैवं दृष्टमिष्टं वा, अत आत्मावबोध एव प्रागुक्तलक्षणः सिद्धिसञ्चर इति दृढमवधारणीयम्।

नन्वतिदुर्गमोऽयं निश्चयव्यवहारनयवादः, न शक्यते मन्दमतिभिरवगन्तुम्, तत् किमेभिः कार्यमात्मबोधलिप्सुभिरिति चेत् ? अत्राह-

**अवरो न निंदियव्वो पसंसिअव्वो**
**कया वि न हु अप्पा।**

**समभावो कायव्वो बोहस्स रहस्समिणमेव ।।४० ।।**

**अपरो न निन्दितव्यः**, स्वविषयभूतदोषाधिगतिहेतुत्वान्निन्दायाः, यदाह- लोओ परस्स दोसे, हत्थाहत्थी गुणे च गिण्हंतो। अप्पाणं अप्पणा च्चिय कुणइ सदोसं सगुणं च - इति (**पुष्पमाला**)। किञ्च लौकिकतन्त्रेष्वपि प्रतिकुष्टा परनिन्दा, अतः लोकोत्तरशासनव्यवस्थितैः सुतरां विधेयस्तत्त्यागः, उक्तश्च-न पापं पापिनां ब्रूयात् तथा पापमपापिनाम्। सत्येन तुल्यदोषी स्या -दसत्येन द्विदोषभाक्- इति (**महाभारतम्**)।

किञ्चान्यत्, **कदाप्यात्मा नैव प्रशं-सितव्यः**, सर्वयत्नेनात्मश्लाघा परिहर्त्तव्ये-त्याशयः, गुणविरेकरूपत्वात्तस्या, तथा चार्षम्- सुट्ठु वि उज्जममाणं पंचेव करिंति रित्तयं समणं। अप्पथुई परनिंदा जिब्भो-वत्था कसाया य - इति **(उपदेशमाला)**।

तथा **समभावः कर्त्तव्यः**, हर्षादि-हेतूनां परमार्थतो हेत्वाभासत्वं प्रपश्यता सदाऽपि समतामृतपरिनिमग्नैरेव भाव्यमिति भावः। तद् **इदमेव बोधस्य रहस्यम्**, सर्वस्याप्यतोऽतिरिक्तस्य परमार्थतोऽत्रैवा-न्तर्भावात्, तथाहि- परनिन्दापरिहार-

प्रकर्षतो द्वेषह्रासः, आत्मश्लाघां परित्य-
जतो रागापकर्षः, समभावानुभावितस्य च मोहविलयः। तदेतत्क्रमेणावाप्यते परमज्ञानं परमसुखञ्च। अतः सूक्तम् - बोधस्य रहस्यमिदमेवेति। एतदप्यात्मज्ञानसाधन-
मित्याह-

**परसक्खित्तं भंजसु रंजसु**
**अप्पाणमप्पणा चेव।**
**वज्जसु विविहकहाओ जइ**
**इच्छसि अप्पविन्नाणं॥४१॥**

परसाक्षित्वं भिन्धि, आत्मसाक्षि-

त्वाद्धर्मस्य, परसाक्षिसापेक्षस्य परमार्थतो-ऽधर्मे पर्यवसानात्, कषायोदयरूपत्वात्, उक्तञ्च - अप्पा जाणइ अप्पा जहट्ठिओ अप्पसक्खिओ धम्मो। अप्पा करेह तं तह जह अप्प सुहावहो होइ - इति (**उपदेश-माला**)। अत **आत्मनैवात्मानं रञ्जय**, तन्मात्रोपायत्वादात्मरक्षणस्य, पररञ्जनस्य प्रत्युत प्रत्यपायावहत्वाच्च, तदुक्तम् - कस्ते निरञ्जन ! चिरं जनरञ्जनेन, धीमन् ! गुणोऽस्ति परमार्थदृशेति पश्य।
तं रञ्जयाऽऽशु विशदैश्चरितैर्भवाब्धौ यस्त्वां
पतन्तमबलं परिपातुमिष्टे - इति

(अध्यात्मकल्पद्रुमः)।

न हि विकथाव्यग्रस्याऽऽत्मरञ्जनावकाश एव स्यादित्याह- **वर्जय विविधकथाः**, तत्प्रमादान्तर्भावस्यैव तद्धेयत्वसिद्धिसाधनत्वात्, संसारसागरनिमज्जनहेतुत्वात्, तदुक्तम् - मज्जं विसयकसाया णिद्दा विगहा य पंचमी भणिया। एए पंच पमाया जीवं पाडंति संसारे - इति।

कुर्वेतदुपदेशत्रितयानुपालनम्, **यद्यात्मविज्ञानमिच्छसि**, सद्व्यवहारानुपालनमन्तरेणाप्राप्य एव शुद्धनिश्चयाभिमत आत्मबोध इति हृदयम्।

उपसंहर्त्तुमिच्छुरुपदेशसर्वस्वमाह-

**तं भणसु गणसु वायसु झायसु**
**उवइससु आयरेसु जिआ।**
**खणमित्तमपि विअक्खण !**
**आयारामे रमसि जेण॥४२॥**

**जीव ! भण** सिद्धान्तश्लोकादि, **गणय** आगमालापकादि, **वाचय** धर्म-कथादि, **ध्यायस्व** आज्ञाविचयादि, **उपदेशय** अहिंसादि, **आचर** ईर्यासमित्यादि। ननु सुबहु विद्यते भणनादियोग्यम्, अतो न ज्ञायते किं भणितव्यादि मम किञ्च

नेति चेत् ? अत्राह- **तदेव** भणनादि-
गोचरीकार्यं त्वया, **येन** हे **विचक्षण** !
- आत्मबोध एव बोधसर्वस्वमितिपारमर्ष-
पीयूषपरिपानपटुमतिः, **क्षणमात्रमपि**
यावत् त्वं **आत्मारामे** - सर्वोत्कृष्टसौन्द-
र्याभिरामे स्वभावोपवने, **रमसि** - सर्व-
सुखसन्दोहस्वामितया सञ्चरणं करोसि।

एतेन येन भणितादिना क्षणमात्रमपि
यावन्न प्राप्यते आत्मरमणता, नापि
परम्परयाऽपि यदात्मारामतानिबन्धनम्, तत्
प्रतिक्रुष्टम्, हेयतया च व्यवस्थापितम्।
तन्मात्रार्थत्वात् सर्वस्यापि योगमार्गस्य

तदहेतोर्भोगमार्गानतिरेकात्। अत एवोक्त-मन्यत्रापि - तमेव सेवस्व गुरुं प्रयत्नादधीष्व शास्त्राण्यपि तानि विद्वान्। तदेव तत्त्वं परिभावयाऽऽत्मन् ! येभ्यो भवेत् साम्य-सुधोपभोगः - इति (अध्यात्मकल्पद्रुमः)। उपसंहरति-

**इय जाणिऊण तत्तं**
**गुरुवइट्ठं परं कुण पयत्तं।**
**लहिऊण केवलसिरिं**
**जेणं जयसेहरो होसि॥४३॥**

इति - अनन्तराभिहितम्, गुरू-

**पदिष्टम्** - सुविहितसम्प्रदायसम्प्राप्तम्, **परं तत्त्वम्** आत्मावबोधलक्षणम्, **ज्ञात्वा** - तद्गोचरसर्वमिथ्यापक्षनिरास पुरस्सरं तत्सत्स्वरूपमवगम्य, तथा **प्रयत्नम्** - तत्संवित्त्यभियोगातिशयम्, **कुरु** - सद्गुरुनियोगानतिक्रममनुपालयन् विदधत्स्व, स्वच्छन्दप्रवृत्त्या आत्माज्ञानमात्रसाधकत्वात्, **येन केवलश्रियम्**, विश्वविश्वशोभातिशयिकेवलज्ञानदर्शनाभिख्याम्, **लब्ध्वा** - शश्वद्भावेनाऽऽत्मसात्कृत्य, **जयशेखरः** मिथ्यात्वमोहविजयलक्षण-मुकुटमालाऽलङ्कृतः, **जगच्छेखरो** वा -

त्रैलोक्यमस्तकव्यवस्थिततया तन्मुकुटमालोपमः **भवसि।** इतरसर्वस्याप्यभियोगस्य भवबम्भ्रमणपर्यवसायितया स्वपादकुठारप्रहारसङ्काशत्वादेतदेव कर्त्तव्यं मतिमता शेषसर्वपरिहारेणेति तात्पर्यम्।

मिथ्याऽस्तु दुरुक्तं मम। शोधयन्तु बहुश्रुताः। कृतिरियमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखसितप्रतिपदि समाप्तेति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત **અધ્યાત્મસાર** આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનપ્રસૂપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ -૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદ-લિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવ-નિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.

(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્યા સંચય.

**ધ્યાનનું મૂળ ગુરુમૂરતિ**
**પૂજા મૂળ ગુરુ પાય।**
**મંત્રનું મૂળ ગુરુવાણી ને**
**શિવ મૂળ સુગુરુ પસાય॥**

– અનુભૂતિગીતા

गुरुकृपाकटाक्षेण
सुलभो ज्ञानसागरः।
यतस्याप्यविनीतस्य
यद्‌बिन्दुरपि दुर्लभः।।

- ગુરુસર્વસ્વમ્
(ઉપનિષત્-સર્વસ્વમ્ અંતર્ગત દ્વયોપનિષદ્-શ્લોકવાર્તિક)

# *Don't Miss it.*




मूलकाराः

महो. श्रीयशोविजयगणिवराः

अनुवादकाराः

आ. श्रीकल्याणबोधिसूरयः

સુકૃત સહયોગી

## શ્રી મહાવીર શ્વે. મૂર્તિ. જૈન સંઘ

વિજયનગર, અમદાવાદ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના

૧૧૨

